# न्यायसिद्धान्तमुक्तावल्यामाख्यातार्थविचारः

**कृष्णपददास अधिकारी**

[१६३६-क्रीष्टाब्दस्य बङ्गीयतार्किकश्रीमद्विश्वनाथन्यायपञ्चानन-विरचितायाः सुप्रसिद्धायाः न्यायसिद्धान्तमुक्तावल्याः शब्दखण्डस्योपरि सुबोधिन्याख्यव्याख्या मया प्रस्तुता। ग्रन्थे ये-ये वादानुवाद-खण्डनमण्डनादिप्रसङ्गाः ग्रन्थकृता वर्णिताः तान्नाधारीकृत्य विषयविभाजनपुरस्सरं सुबोधिनीव्याख्यायाः प्रकरणमिदं प्रस्तूयते। अस्य व्याख्यानस्योत्सरूपेण मद्गुरु-**आचार्यवसिष्ठनारायणझा**रचितः जापान-स्थनागोयाविश्वविद्यालयभारतीयदर्शनविभागपक्षतः संभाषाख्यपत्रिकायां प्रकाशितः '**S*abadakhanda*** **of the** ***Nyayasiddhanta-Muktavali'*** इत्याख्यप्रबन्धो मयाऽऽसादितः। शब्दखण्डमुक्तावलीटीकायाः उपरि आङ्ग्लाभाषायां विरचितोऽयं प्रबन्धः मामिमां सुबोधिनीटीकां रचितुं प्रेरित इत्येभ्यो गुरुभ्यो कार्तज्ञं व्याहरामि। संस्कृतव्याख्यायां सहयोगाय मद्गुरुषूपाचार्येषु **कमलेशमिश्रेषु शठकोपताताचार्येषु** चाहं नितरां कृतज्ञोऽस्मि।]

**(कृतिशक्तिवादखण्डनम्)**

**न्या. मु. - धातुप्रकृतिप्रत्ययादीनां शक्तिग्रहो व्याकरणाद् भवति। क्वचित्तु सति बाधके त्यज्यते। यथा वैयाकरणैराख्यातस्य कर्तरि शक्तिरुच्यते। 'चैत्रः पचती' त्यादौ कर्त्रा सह चैत्रस्याभेदान्वयः। तच्च गौरवात्त्यज्यते। किन्तु कृतौ शक्तिर्लाघवात्। कृतिश्चैत्रादौ प्रकारीभूय भासते।**

**सुबोधिनी -** न्यायमते शक्तपदमिति पदलक्षणाद्धातु-प्रकृति-प्रत्ययानां पदसंज्ञा। पचादिर्धातुः प्रकृतिर्द्रोणादिः ण्वुलादिर्प्रत्ययश्च। अत्र यत् पचादिधातोरर्थः (शक्तिः) पाकः, ण्वुलादेर्कर्तेति कस्माल्लभ्यते? **व्याकरणादि**ति। तथा हि 'चैत्रः पचती'त्यादौ 'लः कर्मणि च भावे चाकर्मकेभ्य'(3/4/69) इत्यनेन कर्तरि लकारे प्रवृत्ते 'वर्तमाने लट्' (3/2/123) इत्यनेन पच् + ल इति स्थिते 'तिप्तस् झि......'(3/4/78) इत्यादिना लस्थाने तिबागमेऽनन्तरं 'शेषात्कर्तरि परस्मैपदं' (1/3/78)

'कर्तरि शप्' (3/1/68) इत्यादिभिः सूत्रैराख्यातस्य कर्तरि शक्तिरिति व्याकरणादवगम्यते। स चाख्यातार्थः कर्ता चैत्रादिपदेन सहाभेदेनान्वेति। तेन वैयाकरणमते 'चैत्रः पचती'त्यस्य 'चैत्राभिन्नैककर्तृकपाकानु-कूलव्यापार' इत्याकारकशाब्दबोधो जायते। एवञ्च पाचकादिपदात् 'पाककर्ते'त्यर्थोऽवगम्यते।

न्यायनये आख्यातार्थो न कर्ता भवेद् गौरवात्। तिप्रत्ययस्यार्थः वैयाकरणैर्यत्कर्तेत्युक्तस्तेन कर्ता शक्यो भवेत्। शक्यता कर्तरि तिष्ठेत्। कर्तृशब्दस्य यौगिकत्वेन कर्तास्थाने कृतिमानित्यर्थ बुध्यते। एतेन कृतिमति शक्यता कल्पनीया। शक्ये विशेषणीभूतो धर्मः शक्यतायाः अवच्छेदको भवति। तेन कृतिमति विशेषणीभूतो धर्मः कृतिः शक्यतायाः अवच्छेदिका भवति। इदानीं शक्यतावच्छेदकधर्मः कृतिर्नैका प्रत्यात्मानं भिन्नत्वादनेका। अनेन शक्यतावच्छेदकेनानन्त्यापत्तिः। शक्यता-वच्छेदकस्यैकत्वेन यल्लाघवो भवेत्तदिदानीं नास्ति। अत एव तिबर्थस्य कृतौ शक्तिस्वीकारे गौरवापत्तिर्न स्यात्। एतेन शक्यः कृतिः। कृतौ शक्यता स्यात्। शक्यतावच्छेदकरूपेण कृतित्वस्य ग्रहणं भवेत्। कृतित्वस्य च जातित्वेनानेकत्वाभावान्नानन्त्यापत्तिरिति। अनेन 'चैत्रः पचती'त्यत्र न्यायनये 'पाकानुकूलकृतिमान् चैत्र' इत्याकारकः शाब्दबोधो जायते। एतन्मते शाब्दबोधप्रक्रियायां प्रथमान्तार्थस्य मुख्यविशेष्यत्वेन चैत्रपदार्थस्य प्राधान्यं न तु धात्वर्थस्य व्यापारस्य। एतेन चैत्रस्य मुख्यविशेष्यत्वम्। तत्र चैत्रे मुख्यविशेष्ये कृतिः प्रकारतया भासते। तस्याः कृतेर्गुणत्वात्।

**(वैयाकरणानामाक्षेपः)**

**न्या. मु. - न च कर्त्तुरनभिधानाच्चैत्रादिपदोत्तरं तृतीया स्यादिति वाच्यम्। कर्तृसंख्यानभिधानस्य तत्र तन्त्रत्वात्।**

**सुबोधिनी :** वैयाकरणानामियमापत्तिः - यदि कर्तास्थाने तिबर्थः कृतिः स्यात्तदा 'चैत्रः पचती'त्यादौ चैत्रपदोत्तरतृतीयाविभक्तेर्प्रयोगः स्यात्। एतेन 'चैत्रः पचती'ति स्थाने 'चैत्रेण पचती'त्यस्य प्रयोगो भवेत्। कारणञ्चात्रानभिहितसूत्रम्। 'अनभिहिते कर्तृकरणयोस्तृतीया' (2/3/1) (2/3/18) इत्यनेन यदि कर्ता करणं चाख्यातेन (तिप्रत्ययेन) नोक्तं तत्र तृतीया प्रयुज्या। तस्मात् 'चैत्रेण पचती'त्यस्य प्रयोगापत्तिः।

नैयायिकाः परिहरन्ति। **तन्त्रत्वादि**त्यादिना। 'अनभिहित' इत्यस्य सूत्रस्यार्थः 'कर्तृसंख्यायाः अनभिहित' इति। अर्थात् यदि कर्तृगता संख्या तिप्रत्ययेन नाभिधीयते तदा प्रातिपदिकश्चैत्रादिस्तृतीयान्तो भवेत्। तिप्रत्ययोऽपि कर्तृगतायाः संख्यायाः वाचकः। यथा 'चैत्रः पचती'त्यस्मिन्नुदाहरणे चैत्रपदं तिप्रत्ययेन उक्तां संख्यां गृह्णाति। तस्मादत्र तृतीयायाः स्थानं नास्ति। परं तु 'चैत्रेण तण्डुलः पच्यत' इत्यादौ तिप्रत्ययः कर्तृगतायाः संख्यायाः वाचको न ततस्तृतीया दृश्यते। वैयाकरणानामत्राशयो भवेत् - यदि सूत्रानुसारं नाख्यातार्थसंख्यान्वयस्तदा तेनाख्यातेन कर्तृगता संख्याऽभिहिताऽस्तीति कथं ज्ञायते? कथं च ज्ञायते आख्यातार्थः संख्या वस्तुतः कर्तरि नान्येष्वन्वितास्तीति? आख्यातार्थसंख्यान्वयस्य किं तन्त्रम्? उत्तरयति -

### (आख्यातार्थसंख्यान्वयः)

**न्या. मु. - संख्याभिधानयोग्यश्च कर्मत्वाद्यनवरुद्धः प्रथमान्तपदोपस्थाप्यः। कर्मत्वादीत्यस्येतर-विशेषणत्वेन तात्पर्याविषयत्वमर्थः। तेन 'चैत्र इव मैत्रो गच्छती'त्यादौ न चैत्रे संख्यान्वयः। यत्र कर्मादौ न विशेषणत्वे तात्पर्यं तद्वारणाय 'प्रथमान्ते'ति।**

**सुबोधिनी :** शाब्दबोधे आख्यातार्थः संख्या प्रकारतया भासत इत्ययं सिद्धान्तः निर्विवादः। परं विवादस्त्वत्रैव यत्, सा संख्या कस्यां दशायां कस्य च प्रकारो भवेदिति। अस्मिन् विषये वैयाकरणमतमुपरि दत्तम्। इदानीं नैयायिकमतमुपस्थापयति **- संख्याभिधानयोग्यश्चे**ति। संख्यायाः अभिधानं संख्याभिधानम्। षष्ठ्याः विषयत्वमर्थः। कीदृशं विषयत्वम्? प्रकारताख्यं विषयत्वम्। तेन संख्याप्रकारकाभिधानं संख्याप्रकारकज्ञानं वेत्यर्थः बोध्यः। तस्य संख्याप्रकारकज्ञानस्य योग्यः कः? अर्थात्तस्य किं विशेष्यम्? अथ वा आख्यातार्थसंख्यानिष्ठप्रकारतायाः निरूपकः को भवेदित्ययमाशयं स्पष्टयेत्। उत्तरयति **- कर्मत्वाद्यनवरुद्ध** इति। रुद्धोऽवरुद्धस्य प्रायेण पर्यायवाचकः। अत्रावरुद्धपदं पारिभाषिकम्। अवरुद्धो नाम विवक्षितः। वक्तुरिच्छायां कश्चिदर्थः रोधित इति यावत्। तेन कर्मत्वाद्यनवरुद्धो नाम कर्मत्व-करणत्वाद्यर्थाः वक्तुरिच्छायाः न विषयाः। तादृशविषयनिष्ठं यद्विषयत्वं (विषयता वा) तच्च कर्मत्वाद्यनवरुद्धत्वावच्छिन्नम्। तथा हि 'देवदत्तः विद्यालयं गच्छती'

त्यादौ विद्यालयस्य कर्मत्वार्थः विवक्षितः। तादृशोऽर्थः देवदत्तेऽविवक्षितः। अत्र हि विद्यालयपदार्थनिष्ठा या विषयता सा कर्मत्वावच्छिन्ना (विद्यालयत्वावच्छिन्ना अम्प्रत्ययपदजन्यैकत्वसंख्यावच्छिन्नाऽपि)। परं तु देवदत्तपदार्थनिष्ठा विषयता देवदत्तत्वावच्छिन्ना तिप्रत्ययपदप्रतिपाद्यैकत्व-संख्यावच्छिन्ना चेति। एतेनात्र देवदत्तपदार्थनिष्ठा विषयता कर्मत्वाद्यनवच्छिन्ना विद्यालयपदार्थनिष्ठविषयता च तिप्रत्ययपदप्रति-पाद्यैकत्वसंख्यानवच्छिन्नेत्यपि वक्तुं शक्नुयात्। तेन देवदत्ते कर्मत्वाद्यविवक्षितः कर्मत्वाद्यनवरुद्ध इति सिध्यते। अत एव यत्पदजन्यः यत्पदार्थस्तत्पदार्थनिष्ठा या विषयता तादृश्याः विषयतायाः अवच्छेदकः यदि कर्मत्वादिकं स्यात्तदाऽऽख्यातार्थः संख्या तादृशपदार्थस्य प्रकारो न। अर्थात् यत्राख्यातार्थसंख्या कर्मत्वादिश्च तस्याः विषयतायाः नावच्छेदकौ तत्र संख्याभिधानयोग्यत्वं नास्तीति भाव्यम्। एतेन 'देवदत्तः विद्यालयं गच्छती'त्यस्य 'विद्यालयकर्मकगमनानुकूलकृतिमान् एकत्वविशिष्टदेवदत्त' इत्याकारकशाब्दबोधो जायते।

ननु कर्मत्वाद्यनवरुद्धेत्यनेनोपादानेन यदि संख्याभिधानयोग्यः योग्यस्तदा 'चैत्र इव मैत्रो गच्छती' त्यादावनुपपत्तिः। चैत्रे कर्मत्वादीनामनवरुद्धत्वादविवक्षितत्वाद्वा चैत्रे आख्यातार्थसंख्यान्वयेन 'चैत्र इव मैत्रो गच्छत' इति प्रयोगः स्यादिति चेत्? न। **कर्मत्वादी**ति। कर्मत्वाद्यनवरुद्ध इत्याकारकं पदोपादानं संख्याभिधानयोग्यत्वनिरूपणे यद्यलं तस्य **इतरविशेषणत्वेन तात्पर्याविषयत्वमि**त्यर्थो गृह्णीयात्। विशेष्यविशेषणभावेनान्वितेषु विषयेषु कश्चिदेकविषयो मुख्यविशेष्यो भवति य न कस्यापि विशेषणं भवति। यथा 'चैत्र इव मैत्रो गच्छती'त्यादौ चैत्रपदार्थः इवार्थसादृश्यपदार्थस्य विशेषणम्। सादृश्यपदार्थश्च मैत्रपदार्थस्य पुनर्विशेषणम्। एवञ्च गमनादिपदार्थाः (कृति-कालादयः) मैत्रस्य विशेषणम् (प्रकारः)। परं तु मैत्रो न कस्यापि (इतरस्य) विशेषणम्। मैत्रोऽन्यस्य कस्यापि पदार्थस्य विशेषणं भवत्विति वक्त्रिच्छायाः अभावात्। तेन तादृशतात्पर्याविषयत्वे आख्यातार्थसंख्यायाः अन्वयो नान्यस्मिन्निति तन्त्रस्यास्यार्थः।

यदि केवलमितरविशेषणत्वे तात्पर्याविषये आख्यातार्थसंख्यायाः अन्वय इति स्वीक्रियते तदा चतस्रः आपत्तयः स्युः। **प्रथमतः** यत्र 'तण्डुलं पचती'ति वाक्यात् 'तण्डुलकर्मकपाकानुकूलव्यापारवांस्तण्डुल'

इत्याकारकबोधे तात्पर्यं तत्राम्प्रत्ययप्रतिपाद्यकर्मत्वस्य विशेषणत्वेन तात्पर्याभावात्तत्र (तण्डुले) संख्यान्वयापत्तिः। **द्वितीयतः** - 'चैत्रेण पच्यत' इत्यादौ कर्माख्यातपदवाच्यकर्मत्वादौ 'चैत्रकर्तृकपाककर्मत्वमि' त्याकारक-कर्मत्वमुख्यविशेष्यकशाब्दबोधे कर्मत्वपदार्थ इतरस्य विशेषणत्वेन तात्पर्याविषयत्वात्तत्रापि कर्मत्वे आख्यातार्थसंख्यायाः अन्वयो स्यादिति। **तृतीयतः** - यस्मिन् बोधे केवलं विशेषणपदार्थाः भासन्ते यथा 'तण्डुलं पचती' त्यादौ 'तण्डुलकर्मकपाकानुकूलकृतिमान्नि' त्यादिष्वितरस्य विशेषणत्वेन तात्पर्याविषयरूपस्य कस्यापि पदार्थस्योल्लेखनाभावात् तिबर्थसंख्यायाः अन्वयो कुत्र भवेदितीदमपि दूषणम्। **चतुर्थतः** - यत्र कश्चित्तण्डुलस्य कर्मत्वाविवक्षायां 'चैत्रः व्यञ्जनं पचती' ति नोक्त्वा भ्रमत 'श्चैत्रस्तण्डुलं पचती' त्युक्तवांस्तत्र तण्डुलरूपकर्मत्वस्य विशेषणत्वमविवक्षितमिति हेतोस्तत्तण्डुले संख्यान्वयापत्तिः स्यादिति चेत्?

समाधत्ते - **प्रथमान्तपदोपस्थाप्य** इत्यादिना। सतामपि तण्डुलादीनां विशेषणत्वं परं तु तत्तत्तण्डुलादीनां प्रथमान्तताभावान्न तत्र संख्यान्वयापत्तिः। एतेन सर्वेषामुदाहरणानां व्यवस्थितिरिति प्राचाम्। नव्यास्तु -

### (नव्यनैयायिकानां मतम्)

**न्या. मु. - यद्वा धात्वर्थातिरिक्ताविशेषणत्वं प्रथमदलार्थः। तेन 'चैत्र इव मैत्रो गच्छती'त्यादौ चैत्रादेर्वारणम्। 'स्तोकं पचती'त्यादौ स्तोकादेर्वारणाय द्वितीयदलम्। तस्य द्वितीयान्तपदोपस्थाप्यत्वाद्वारण-मिति।**

**सुबोधिनी** : संख्याभिधानयोग्यत्वनिर्णये प्रथमं यत्कर्मत्वाद्य-नवरुद्धेति दलं प्रयुक्तं तेन 'चैत्रः इव मैत्रो गच्छती'त्यादौ यदव्याप्तं घटितं तद्वारणाय विवृतमितरविशेषणत्वेन तात्पर्याविषयत्वमिति। इतरविशेषणत्वेन तात्पर्याविषयरूपस्याप्यव्यापकता 'चैत्रेण तण्डुलः पच्यत' इत्यादावनुभूतत्वात्पुनरुक्तं प्रथमान्तपदोपस्थाप्येति। एतत्सर्वं प्राचीनमतं परित्यागोपायं नवीनाः साम्प्रतं दर्शयन्ति - **यद्वे**त्यादिना। किञ्चानेनापि व्यापारमुख्यशाब्दबोधानुगतं वैयाकरणमतमपि साधयितुं

शक्यत इति नव्यनैयायिकाश्चिन्तयन्ति। द्वितीयदलस्य कथमपि परित्यागोपायविरहादुक्तं - **स्तोकं पचतीत्यादा**विति। अग्रे स्पष्टयिष्यामः।

शाब्दबोधप्रक्रियायां व्याकरणनये धात्वर्थव्यापारो न्यायनये तु प्रथमान्तार्थो मुख्यविशेष्यो भवति। न्यायव्याकरणयोर्मध्ये मुख्यतोऽस्मिन् प्रसङ्गे विरोधो दृश्यते। परमाख्यातार्थसंख्यायाः प्रथमान्तार्थे चैत्रादिपदार्थेऽन्वये नास्ति कश्चिद्विरोधः। एतयोर्विरोधाविरोधस्थलयोः ग्रन्थकारेणैकेनैव समाधानं प्रदत्तम् - **धात्वर्थातिरिक्ताविशेषणत्वमि**ति। अत्र धात्वर्थातिरिक्ताविशेषणत्वमिति विभक्त्यर्थभिन्नधात्वर्थातिरिक्ता-विशेषणत्वमित्यर्थो बोध्यः। अन्यथा धात्वर्थातिरिक्ताविशेषणत्वमात्रेण प्रत्ययार्थेऽपि संख्यान्वयः स्यात्।

पूर्वं दृष्टं विशेषणे संख्यायाः अन्वयीकरणे न्यायमतं संगतं परं व्याकरणमतमसङ्गतं घटितमिति। धात्वर्थव्यापारे क्वचित्तिबर्थसंख्या-न्वयसंभावनादिति। परमिदानीं धात्वर्थातिरिक्तपदनिवेशेन न तथा। व्यापारस्य धात्वर्थत्वेन तद्भिन्ने चैत्रादिपदार्थे संख्यायाः अन्वयात्। तथा ह्येतन्मते 'चैत्र पचती'ति वाक्याज्जायमाने 'चैत्राभिन्नैककर्तृकगमना-नुकूलव्यापार' इत्याकारकशाब्दबोधे चैत्रः यद्यपि व्यापारस्य विशेषणं परन्तु व्यापारं (विभक्त्यर्थं च) विहाय चैत्रो न कस्यापि विशेषणम्। अतस्तस्मिन् चैत्रे युगपद् धात्वर्थातिरिक्तत्वमविशेषणत्वं च संगच्छेताम्। एतेन चैत्रे संख्यान्वयविधानमिदमुभयपरम्परान्तर्भावकमिति। तथैव 'चैत्र इव मैत्रो गच्छती'त्यादावपि व्याकरणमते चैत्रनिरूपित-सादृश्यवान्-मैत्रकर्तृक-गमनमिति शाब्दबोधे चैत्रः सादृश्यस्य विशेषणम्। तच्च इवार्थ-सादृश्यं न धात्वर्थः। परन्तु मैत्रः धात्वर्थगमनस्य विशेषणमतः तिबर्थः संख्या मैत्र एवान्वयेत् न चैत्रे। तस्य मैत्रस्य चोभयं धात्वर्थातिरिक्तत्वादविशेषणत्वाच्च। अर्थात् तिबर्थसंख्या मैत्रे प्रकारीभूयो भासते। परन्त्वत्र नैयायिकानामेकेनैवाविशेषणाख्यधर्मेण कार्य-निर्वहणान्नास्ति किञ्चिद्द्वितीयदलस्य (धात्वर्थातिरिक्तत्वस्य/विभक्त्यर्थस्य वा) प्रयोजनम्। तेनैतन्मते 'चैत्रनिरूपितसादृश्यवान्गमनानुकूलैकत्ववान्-कृतिमान्मैत्रः' इत्याकारकप्रथमान्तार्थ-मुख्यविशेष्यकशाब्दबोधे न क्वाप्यसंगतिरिति।

द्वितीयदलस्य प्रयोजनं निरूपयति - **'स्तोकं पचती'**त्यादिना। ननु धात्वर्थातिरिक्ताविशेषणमित्यनेन प्रथमदलार्थं स्वीकृत्य उभययोः

न्यायव्याकरणयोः संख्याभिधानयोग्यत्वं निरूपयितुं किं सर्वत्र शक्यते? यदि प्रथमविशेषणेन यथा कर्मत्वाद्यनवरुद्धेन धात्वर्थातिरिक्ताविशेषणेन वा संख्याभिधानयोग्यत्वं संगतमिति मन्यते तदा 'स्तोकं पचती'त्यादौ 'कर्तृवृत्तिस्तोकाभिन्नपाक' इत्याकारकव्याकरणोक्तशाब्दबोधेऽनुपपत्तिः स्यात्। स्तोकस्य धात्वर्थातिरिक्ताविशेषणत्वेन तस्मिन् संख्याभिधानयोग्यत्वसंभवादिति चेत्? न। तस्य प्रथमान्तत्वाभात्। अतोक्तम् - **प्रथमान्तपदोपस्थाप्ये**ति। तेन स्तोकपदमत्र क्रियाविशेषणत्वात् द्वितीयैव। तस्य द्वितीयात्वान्न तत्र सख्याभिधानयोग्यत्वस्य प्रसक्तिः।

## (मीमांसकमतखण्डनम्)

**न्या. मु. - एवं व्यापारेऽपि न शक्तिगौरवात्। 'रथो गच्छती'त्यादौ तु व्यापारे आश्रयत्वे वा लक्षणा। 'जानाती'त्यादौ त्वाश्रयत्वे 'नश्यती'त्यादौ तु प्रतियोगित्वे निरूढा लक्षणा।**

**सुबोधिनी :** आख्यातस्य कर्तरि कृतौ वेति शक्तिविवादं परित्यज्य तस्य व्यापारे शक्तिः किमर्थं न स्वीक्रियत इति मीमांसकाः कृतिशक्तिवादिनां नैयायिकानां मतं दूषयन्ति। आख्यातस्य कृतौ शक्तिस्वीकारे 'रथो गच्छती'त्यस्य वाक्यस्य 'गमनानुकूलकृतिमान् रथः' इत्याकारके शाब्दबोधेऽनुपपत्तिः स्यात्। चेतनाभावविशिष्टे रथे कृतेरभावात्। तस्मादाख्यातस्य कृतौ शक्तिर्न तस्य व्यापारे शक्तिः स्वीकार्या। तेन 'गमनानुकूलव्यापारवान्-रथ' इत्युक्ते न काप्यनुपपत्तिरिति चेत्? न। तिबर्थः यदि व्यापारः स्यात्तेन शक्यः व्यापारः शक्यता च व्यापारे स्यात्। शक्यतावच्छेदकः व्यापारत्वमेव भवेत्। तच्च व्यापारत्वं न जातिः। तस्यानेकत्वेन शक्यतावच्छेदकस्यानन्त्यम्। न्यायनये शक्यतावच्छेदकस्यैकत्वमेवाभीष्टम्। यन्नात्र लभ्यते, अतो न व्यापारे शक्तिः।

ननु व्यापारे यदि न शक्तिस्तर्हि 'रथो गच्छती'त्यस्य कः शाब्दबोधः? न हि 'गमनानुकूलकृतिमान् रथ' इति वाच्यमिति चेत्? समाधत्ते। द्विविधा खलु पदवृत्तिः। शक्ति-लक्षणेति भेदात्। यत्र शक्त्या पदार्थोपस्थितिर्न संभवति तत्र लक्षणा आश्रयणीया इत्यन्यतरा रीतिः विहितास्ति। अतोऽस्मिन्नुदाहरणे गम् धातूत्तराख्यातस्य व्यापारे लक्षणा स्वीकार्या। एतेन 'गमनानुकूलव्यापारवान् रथ' इति शाब्दबोधो

जायते। कश्चन यदि तर्कयेत् यदाख्यातस्य व्यापारार्थः शक्त्या एवोपस्थापयेन्न तु लक्षणयेति। तदप्यसंगतम्। शक्त्या कृतावेव शक्तिर्न व्यापारे। यदि लक्षणया व्यापारेऽर्थो न स्वीक्रियते तर्ह्याश्रयत्वे स्वीक्रियताम्। एतेन 'गमनाश्रयत्ववान् रथ' इति शाब्दबोधे नासंगतिः।

ननु कृतिशक्तिवादस्वीकारे 'देवदत्तो जानाती'त्यादौ सिद्धान्तविरोधः स्यात्। 'ज्ञानानुकूलकृतिमान् देवदत्त' इत्याख्यशाब्दबोधस्थले ज्ञानं कृतिजन्यं स्यात्। परम्परया कृतेर्जनकं तु ज्ञानमेव। सत्यम्। अस्मिन् स्थले ('इच्छति', 'यतत' इत्यादिषु स्थलेष्वपि) तिबर्थस्याश्रयत्वे लक्षणा स्वीकार्या। एतेन नैव सिद्धान्तविरोधो भवेत्। तथा हि - 'देवदत्तो जानाती'त्यस्य वाक्यस्य 'ज्ञानाश्रयत्ववान् देवदत्तः' इति शाब्दबोधः।

'रथो गच्छती'त्यत्र रथे चैतन्याभावं प्रदर्श्य तिबर्थस्य कृतौ शक्तिं परित्यज्याश्रयत्वे लक्षणा स्वीकृता। तथैव 'घटो नश्यती'त्यत्र तथाभावं प्रदर्श्य आश्रयत्वे लक्षणा किमर्थं न स्वीक्रियत इति चेत्? मैवम्। 'नाशाश्रयत्ववान् घट' इत्यस्याप्रसिद्धेः। तिबर्थस्यात्र प्रतियोगित्व एव लक्षणा न त्वाश्रयत्वे। एवं 'नाशाश्रयत्ववान् घट' इत्यनेन शाब्दबोधेन नाशस्य आश्रयो घटो भवति। घटस्यैव नाशो भवति न तु घटो नाशस्याश्रयः। तस्मात् प्रतियोगित्वे निरूढलक्षणा। किं नाम निरूढत्वम्? अनादितात्पर्यविषयीभूतत्वं निरूढत्वम्। आश्रयत्वप्रतियोगित्वानामनादितात्पर्यविषयीभूतत्वान्निरूढत्वमिति।

*व्याख्याता*
**संस्कृतविभागः**
**साँओताल-विद्रोह-सार्धशतवार्षिकी महाविद्यालयः**
**गोयालतोड, पश्चिम-मेदिनीपुरम्, पश्चिम-बङ्गः**
***krishnapada06@rediffmail.com***

---000---